# શિવ પ્રાતઃ સ્મરણ સ્તોત્રમ

ૐ

શિવપ્રાતઃસ્મરણસ્તોત્રમ્ .

પ્રાતઃ સ્મરામિ ભવભીતિહરં સુરેશં
    ગઙ્ગાધરં વૃષભવાહનમમ્બિકેશમ્ .
ખટ્વાઙ્ગશૂલવરદાભયહસ્તમીશં
    સંસારરોગહરમૌષધમદ્વિતીયમ્ .. ૧..
પ્રાતર્નમામિ ગિરિશં ગિરિજાર્ધદેહં
    સર્ગસ્થિતિપ્રલયકારણમાદિદેવમ્ .
વિશ્વેશ્વરં વિજિતવિશ્વમનોભિરામં
    સંસારરોગહરમૌષધમદ્વિતીયમ્ .. ૨..
પ્રાતર્ભજામિ શિવમેકમનન્તમાદ્યં
    વેદાન્તવેદ્યમનઘં પુરુષં મહાન્તમ્ .
નામાદિભેદરહિતં ષડ્ભાવશૂન્યં
    સંસારરોગહરમૌષધમદ્વિતીયમ્ .. ૩..